॥ श्रीः ॥

हरिदास संस्कृत ग्रन्थमाला
२८१

श्रीमत्पाणिनिमुनिप्रणीतः

धातुपाठः

धात्वर्थप्रकाशिकया टिप्पण्या समलङ्कृतः

टिप्पणीकारः
पण्डित श्रीकनकलालशर्मा

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१
१९६९

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

मुद्रक : विद्याविलास प्रेस, वाराणसी

संस्करण : द्वितीय, वि० संवत् २०२५

मूल्य : ०—[illegible]

© The Chowkhamba Sanskrit Series Office

Gopal Mandir Lane,
P. O. Chowkhamba, Post Box 8,
Varanasi-1 (India)
1969
Phone : 3145

प्रधान शाखा

चौखम्बा विद्याभवन

चौक, पो० बा० ६६, वाराणसी-१

फोन : ३०७६

THE
HARIDAS SANSKRIT SERIES
281

THE DHĀTUPĀṬHA

OF

PĀṆINI

With

THE DHĀTVARTHA PRAKĀŚIKĀ NOTES

By
Pt. KANAKALĀL ŚARMĀ

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
VARANASI-1
1969

Second Edition

1969

Price Rs. 0-75

Also can be had of

THE CHOWKHAMBA VIDYABHAWAN

Publishers & Oriental Book-Sellers

Chowk, Post Box 69, Varanasi-1 (India)

Phone : 3076

॥ श्रीरस्तु ॥

अथ पाणिनीयो धातुपाठः

भ्वादयः

१ भू सत्तायाम् । 'उदात्तः परस्मैभाषः' ॥

अथ षट्त्रिंशत्तवर्गीयान्ता आत्मनेपदिनः ।

२ एध वृद्धौ ।

३ स्पर्ध सङ्घर्षे ।

४ गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च ।

५ बाधृ लोडने ।

६ नाथृ-

७ नाधृ याच्ञोपतापैश्वर्याशीःषु ।

८ दध धारणे ।

९ स्कुदि आप्रवणे ।

१० श्विदि श्वैत्ये ।

११ वदि अभिवादनस्तुत्योः ।

१२ भदि कल्याणे सुखे च ।

१३ मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु ।

१४ स्पदि किञ्चिच्चलने ।

१५ क्लिदि परिदेवने ।

१६ खुद हर्षे ।

१७ दद दाने ।

१८ ष्वद-

१९ स्वर्द आस्वादने ।

२० उर्द माने क्रीडायां च ।

२१ कुर्द-

२२ खुर्द-

२३ गुर्द-

२४ गुद क्रीडायामेव ।

---

१ सत्ता—आत्मधारणानुकूलव्यापारः ।

२ वृद्धिः—वर्द्धनम् उपचयः ।

३ संघर्षः—पराभिभवेच्छा ।

४ प्रतिष्ठा—ख्यातिः-लिप्सा-लब्धुमिच्छा प्राप्त्यभिलाषा ।

५ लोडनम्—प्रतिघातः ।

६ याच्ञा—भिक्षा-उपतापो रोगः ।

९ आप्रवणम्—आप्लवनम्-उत्प्लवः । उद्धरणञ्च ।

१० श्वैत्यम्-श्वेतस्य भावः-शुक्लीभवनम् ।

११ अभिवादनम्—नमस्कारः ।

१३ मोदः—सन्तोषः । मदो गर्वः । स्वप्न आलस्यम् । कान्तिरिच्छा ।

१४ किञ्चिच्चलनम्—मन्दगमनम् ।

१५ परिदेवनम्—शोकः ।

१७ दानम्—स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादनम् ।

१८-१९ आस्वादनम्—अनुभवः ।

२० मानम्—परिमाणम् ।

२५ षूद क्षरणे ।
२६ ह्लाद अव्यक्ते शब्दे ।
२७ ह्लादी सुखे च ।
२८ स्वाद आस्वादने ।
२९ षर्द कुत्सिते शब्दे ।
३० यती प्रयत्ने ।
३१ युतृ-
३२ जुतृ भासने ।
३३ विथृ-
३४ वेथृ याचने ।
३५ ग्रथि शैथिल्ये ।
३६ ग्रथि कौटिल्ये ।
३७ कत्थ श्लाघायाम् ॥
'एधादय उदात्ता अनुदात्तेत आत्मनेभाषाः' अथाष्टत्रिंशत्तवर्गीयान्ताः ॥
३८ अथ सातत्यगमनो ।
३९ चिती संज्ञाने ।

---

२५ क्षरणम्—प्रस्रवणम् ।
२६ अव्यक्तः—अस्फुटः ।
२९ कुत्सितः शब्दः गुदरवः ।
३० प्रयत्नः—उद्योगः ।
३२ भासनम्—दीप्तिः ।
३४ याचनम्—भिक्षा ।
३५ शैथिल्यम्—अवयवानां विभागः विशरणं च ।
३६ कौटिल्यं—कुटिलता, वक्रता ।
३७ श्लाघा—अविद्यमानगुणसम्बन्धज्ञापनम् ।
३८ सातत्यगमनम्—अनवरतचलनम् ।
३९ संज्ञानम्—सम्यक् ज्ञानम् बोधः ।

४० श्च्युतिर् आसेचने ।
४१ श्च्युतिर् (श्चुतिर्) क्षरणे ।
४२ मन्थ विलोडने ।
४३ कुथि-
४४ पुथि-
४५ लुथि-
४६ मथि हिंसासंक्लेशनयोः ।
४७ षिध गत्याम् ।
४८ षिधू शास्त्रे माङ्गल्ये च ।
४९ खाद भक्षणे ।
५० खद स्थैर्ये हिंसायां च ।
५१ बद स्थैर्ये ।
५२ गद व्यक्तायां वाचि ।
५३ रद विलेखने ।
५४ णद अव्यक्ते शब्दे ।
५५ अर्द गतौ याचने च ।
५६ नद-
५७ गर्द शब्दे ।
५८ तर्द हिंसायाम् ।
५९ कर्द कुत्सिते शब्दे ।
६० खर्द दन्दशूके ।
६१ अति-
६२ अदि बन्धने ।
६३ इदि परमैश्वर्ये ।
६४ बिदि अवयवे ॥
भिदि इत्येके ॥

---

६० दन्दशूकः—दन्दशूककर्तृकक्रिया ।
६४ अवयवः—एकदेशः ।

६५ गडि वदनैकदेशे ।
६६ णिदि कुत्सायाम् ।
६७ टुनदि समृद्धौ ।
६८ चदि आह्लादे दीप्तौ च ।
६९ त्रदि चेष्टायाम् ।
७० कदि-
७१ क्रदि-
७२ क्लदि आह्वाने रोदने च ।
७३ क्लिदि परिदेवने ।
७४ शुन्ध शुद्धौ ॥

'अतादय उदात्ता उदात्तेतः परस्मैभाषाः ॥
अथ कवर्गीयान्ताः आत्मनेपदिनः द्विचत्वारिंशत् ॥

७५ शीकृ[1] सेचने ।
७६ लोकृ दर्शने ।
७७ श्लोकृ सङ्घाते ।
७८ द्रेकृ-
७९ ध्रेकृ शब्दोत्साहयोः ।
८० रेकृ शङ्कायाम् ।
८१ सेकृ-
८२ सोकृ-
८३ खकि-
८४ अकि-
८५ श्लकि गतौ ।
८६ शकि शङ्कायाम् ।
८७ अकि लक्षणे ।
८८ वकि कौटिल्ये ।
८९ मकि मण्डने ।
९० कक लौल्ये ।
९१ कुक-
९२ वृक आदाने ।
९३ चक तृप्तौ प्रतिघाते च ।
९४ ककि-
९५ वकि-
९६ श्वकि-
९७ त्रकि-
९८ डौकृ-
९९ त्रौकृ-
१०० ष्वष्क-
१०१ वस्क-
१०२ मस्क-
१०३ टिकृ-
१०४ टीकृ-

---

६५ वदनैकदेशः—मुखावयवः (कपोलः) (गण्डस्थलम्)
६६ कुत्सा—निन्दा ।
६७ समृद्धिः—सम्यक् वर्द्धनम् ।
६८ आह्लादः—हर्षः । रोदनं-क्रन्दनम् ।
७२ आह्वानम्—आकारणम् ।
७३ परिदेवनम्—शोकः ।
७४ शुद्धिः—शौचकर्म ।
७५ सेचनम्—आर्द्रीकरणम् ।
७६ दर्शनम्—प्रेक्षणम् ।
७७ सङ्घातः—समूहः । समुदायः ।
(१) 'स्लोकृ । इति पाठान्तरम् ।

८७ लक्षणम्—अङ्कनम्—(चिह्नम्) ।
८९ मण्डनम्—भूषणम् ।
९० लौल्यम्—गर्वः—चापल्यश्च ।
९२ आदानम्—ग्रहणम् ।
तृप्तिः—तर्पणम् ।
(१) 'स्वकि' । इति पाठान्तरम् ।

१०५ तिकृ-
१०६ तीकृ-
१०७ रघि-
१०८ लघि गत्यर्थाः ॥
तृतीयो दन्त्यादिरित्येके ॥
लघि भोजननिवृत्तावपि ॥
१०९ अघि-
११० वघि-
१११ मघि गत्याक्षेपे ।
गतौ गत्यारम्भे चेत्यपरे ।
मघि कैतवे च ॥
११२ राघृ-
११३ लाघृ-
११४ द्राघृ सामर्थ्ये ।
ध्राघृ इत्यपि केचित् ।
द्राघृ आयामे च ॥
११५ श्लाघृ कत्थने ॥
'शीकादय उदात्ता अनुदात्ता
अनुदात्तेत आत्मनेभाषाः' ॥
अथ कवर्गीयान्ताः परस्मै-
पदिनः अष्टपञ्चाशत् ॥
११६ फक्क नीचैर्गतौ ।
११७ तक हसने ।

११८ तकि कृच्छ्रजीवने । (शुक गतौ ।)
११९ बुक्क भषणे ।
१२० कख हसने ।
१२१ ओखृ-
१२२ राखृ-
१२३ लाखृ-
१२४ द्राखृ-
१२५ ध्राखृ शोषणालमर्थयोः ।
१२६ शाखृ-
१२७ श्लाखृ व्याप्तौ ।
१२८ उख-
१२९ उखि-
१३० वख-
१३१ वखि-
१३२ मख-
१३३ मखि-
१३४ णख-
१३५ णखि-
१३६ रख-
१३७ रखि-
१३८ लख-
१३९ लखि-
१४० इख-
१४१ इखि-
१४२ ईखि-
१४३ वल्ग-
१४४ रगि -

---

१११ गतिः—गत्यारम्भः । आक्षेपः—निन्दा ।
१११ कैतवम्—धौर्त्यम् ।
११४ सामर्थ्यं—पराक्रमः ।
११४ आयामः—दैर्घ्यम् ।।
११५ कत्थनम्—श्लाघा ।
११६ नीचगतिः—मन्दगमनम् ।

११८ कृच्छ्रजीवनम् ।
(कम्पनम्—चलनम्)

१४५ लगि-
१४६ अगि-
१४७ वगि-
१४८ मगि-
१४९ तगि-
१५० त्वगि-
१५१ श्रगि-
१५२ श्लगि-
१५३ इगि-
१५४ रिगि-
१५५ लिगि गत्यर्थाः ॥
रिख (रिखि लिख लिखि) त्रख त्रिखि शिखि इत्यपि केचित् ।
त्वगि कम्पने च ॥
१५६ युगि-
१५७ जुगि-
१५८ वुगि वर्जने ।
१५९ घघ हसने । (दघि पालने । लघि शोषणे ।)
१६० मघि मण्डने ।
१६१ शिघि आघ्राणे । (अर्घ मूल्ये) । "फक्कादय उदात्तेतः परस्मैभाषाः" ॥
अथ चवर्गीयान्ताः आत्मनेपदिनः एकविंशतिः ॥

१५८ वर्जनम्—त्यागः ।
१६० मण्डनम्—भूषणम्-शोभाच ।
१६१ आघ्राणम्—गन्धोपादानम् ।

१६२ वर्च दीप्तौ ।
१६३ पच सेचने सेवने च ।
१६४ लोचृ दर्शने ।
१६५ शच व्यक्तायां वाचि ।
१६६ श्वच-
१६७ श्वचि गतौ । (शचि च ।)
१६८ कच बन्धने ।
१६९ कचि-
१७० काचि दीप्तिबन्धनयोः ।
१७१ मच-
१७२ मुचि कल्कने । कथन इत्यन्ये ॥
१७३ मचि धारणोच्छ्रायपूजनेषु ।
१७४ पचि व्यक्तीकरणे ।
१७५ प्रच प्रसादे ।
१७६ ऋज गतिस्थानार्जनोपार्जनेषु ।
१७७ ऋजि-
१७८ भृजी भर्जने ।

१६२ दीप्तिः—प्रकाशः ।
१६३ सेचनम्-आर्द्रीकरणम् । सेवनं शुश्रूषा ।
१६४ दर्शनम्—प्रेक्षणम् । (अवलोकनम्) ।
१६५ व्यक्ता वाक्—स्फुटा—वाणी ।
१६८ बन्धनम्—संयमनम् ।
१७२ कल्कनम्—दम्भः—शाठ्यं च (कथनम्) ।
१७३ धारणम्—ग्रहणम्—उच्छ्रायः उन्नतिः-पूजनम्—अर्चा ।
१७४ व्यक्तीकरणम्—स्फुटीकरणम् ।
१७५ प्रसादः—प्रसन्नता ।
१७८ भर्जनम्—जलं विना तण्डुलादेः सन्तापविशेषः ।

१७९ एज्-
१८० भ्रेजृ-
१८१ भ्राजृ दीप्तौ ।
१८२ ईज गतिकुत्सनयोः ॥

'वर्चादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥
अथ चवर्गीयान्ता व्यञ्जन्ताः परस्मैपदिनः द्विसप्ततिः ॥

१८३ शुच शोके ।
१८४ कुच शब्दे तारे ।
१८५ कुञ्च-
१८६ क्रुञ्च कौटिल्याल्पीभावयोः ।
१८७ लुञ्च अपनयने ।
१८८ अञ्चु गतिपूजनयोः ।
१८९ वञ्चु-
१९० चञ्चु-
१९१ तञ्चु-
१९२ त्वञ्चु-
१९३ म्रुञ्चु-
१९४ म्लुञ्चु-
१९५ म्रुचु-
१९६ म्लुचु गत्यर्थाः ।
१९७ ग्रुचु-
१९८ ग्लुचु-
१९९ कुजु-

---

१८२ कुत्सनम्—गर्हणम् ।
१८६ कौटिल्यं—कुटिलता अल्पीभावः-न्यूनीभवनम् ।
१८७ अपनयनं—दूरीकरणम् ।

२०० खुजु स्तेयकरणे ।
२०१ ग्लुञ्चु-
२०२ षस्ज गतौ । (षस्जिरात्मनेपद्यपि) ।
२०३ गुजि अव्यक्ते शब्दे ।
२०४ अर्च पूजायाम् ।
२०५ म्लेच्छ अव्यक्ते शब्दे ।
२०६ लछ-
२०७ लाछि लक्षणे ।
२०८ वाछि इच्छायाम् ।
२०९ आछि आयामे ।
२१० ह्रीछ लज्जायाम् ।
२११ हुर्छा कौटिल्ये ।
२१२ मुर्छा मोहसमुच्छ्राययोः ।
२१३ स्फुर्छा विस्तृतौ ।
२१४ युच्छ प्रमादे ।
२१५ उछि उञ्छे ।
२१६ उच्छी विवासे ।
२१७ ध्रज-
२१८ ध्रजि-
२१९ धृज-

---

२०० स्तेयकरणम्—चौर्यव्यापारः ।
२०७ लक्षणम्—चिह्नम् ।
२०९ आयामः—दैर्घ्यम् ।
२१० लज्जा—व्रीडा ।
२१२ मोहः—अविवेकः—समुच्छ्रायः, समुन्नतिः ।
२१३ विस्तृतिः—विस्तारः ।
२१४ प्रमादः—अनवधानता ।
२१५ उञ्छः कणश आदानम् ।
२१६ विवासः—समाप्तिः ।

२२० धृजि-
२२१ ध्वज-
२२२ ध्वजि गतौ । (ध्रिज च)
२२३ कूज अव्यक्ते शब्दे ।
२२४ अर्ज-
२२५ षर्ज अर्जने ।
२२६ गर्ज शब्दे ।
२२७ तर्ज भर्त्सने ।
२२८ कर्ज व्यथने ।
२२९ खर्ज पूजने च ।
२३० अज गतिक्षेपणयोः ।
२३१ तेज पालने ।
२३२ खज मन्थे । (कज मद इत्येके) ।
२३३ खजि गतिवैकल्ये ।
२३४ एजृ कम्पने ।
२३५ टुओस्फूर्जा वज्रनिर्घोषे ।
२३६ क्षि क्षये ।
२३७ क्षीज अव्यक्ते शब्दे ।
२३८ लज-
२३९ लजि भर्जने ।
२४० लाज-
२४१ लाजि भर्त्सने च ।
२४२ जज-
२४३ जजि युद्धे ।
२४४ तुज हिंसायाम् ।
२४५ तुजि पालने ।
२४६ गज-
२४७ गजि-
२४८ गृज-
२४९ गृजि-
२५० तुज-
२५१ तुजि शब्दार्थाः । गज मदने च ।
२५२ वज-
२५३ व्रज गतौ । शुभादय उदात्ता उदात्तेतः (क्षिवर्ज) परस्मैभाषाः ॥ अथ टवर्गीयान्ताश्चाडन्ताः आत्मनेपदिनः षट्त्रिंशत् ॥
२५४ अट्ट अतिक्रमहिंसयोः ।
२५५ वेष्ट वेष्टने ।
२५६ चेष्ट चेष्टायाम् ।
२५७ गोष्ट-
२५८ लोष्ट सङ्घाते ।
२५९ घट्ट चलने ।

---

२२७ भर्त्सनम्—अपकारः ।
२२८ व्यथनम्—भयं—सञ्चलनञ्च ।
२३२ मन्थ—विलोडनम् ।
२३३ गतिवैकल्यम्—गमनविकलता ।
२३५ वज्रनिर्घोषः—वज्रशब्दः ।
२३६ क्षयः—नाशः ।
भर्जनम्—अस्यार्थ उक्तः ।
२४४ हिंसा—प्राणवियोगानुकूलव्यापारः ।
२४५ पालनं—रक्षणम् ।
१५१ मदनम्—मदः—चित्तविकारः ।
२५४ अतिक्रमः—जयः
२५५ वेष्टनम्—परिवेष्टनम् ।
२५६ चेष्टा—शरीरव्यापारः ।
२५७ सङ्घातः—समूहः ।

२६० स्फुट विकसने ।
२६१ अठि गतौ ।
२६२ वठि एकचर्यायाम् ।
२६३ मठि-
२६४ कठि शोके ।
२६५ मठि पालने ।
२६६ हेठ विबाधायाम् ।
२६७ एठ च ।
२६८ हिडि गत्यनादरयोः ।
२६९ हुडि सङ्घाते ।
२७० कुडि दाहे ।
२७१ वडि विभाजने ।
२७२ मडि च ।
२७३ भडि परिभाषणे ।
२७४ पिडि सङ्घाते ।
२७५ मुडि मार्जने ।
२७६ तुडि तोडने ।
२७७ हुडि वरणे ॥ हरण इत्येके ॥
(स्फुडि विकसने)

२७८ चडि कोपे ।
२७९ शडि रुजायां सङ्घाते च ।
२८० तडि ताडने ।
२८१ पडि गतौ ।
२८२ कडि मदे ।
२८३ खडि मन्थे ।
२८४ हेडृ-
२८५ होडृ अनादरे ।
२८६ बाडृ आप्लाव्ये ।
२८७ द्राडृ-
२८८ ध्राडृ विशरणे ।
२८९ शाडृ श्लाघायाम् ॥ अष्टादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ अथ टवर्गीयान्तसमाप्तेः परस्मैपदिनः पञ्चाशत् ॥
२९० शौटृ गर्वे ।
२९१ यौटृ बन्धे ।
२९२ म्लेटृ ।
२९३ म्रेडृ उन्मादे ।

---

२६० विकसनम्—अवयवविभागः ।
२६२ एकचर्या—सहायं विना चरणम् ।
२६३ शोकः—इह आध्यानम् ।
२६६ विबाधः—विशेषेण बाधा शाठ्यम् ।
२६८ अनादरः—तिरस्कारः ।
२७० दाहः—भस्मीकरणम् ।
२७१ विभाजनम्—विभागः ।
२७३ परिभाषणम्—परिहासः—सनिन्दोपालम्भश्च ।
२७५ मार्जनम्—शुद्धिर्न्यग्भावश्च ।
२७६ तोडनम्—प्रतिघातः ।
२७७ वरणम्—स्वीकारः ।

२७९ रुजा—रोगः ।
२८० ताडनम्—आघातः ।
२८२ मदः—चित्तविकारः ।
२८३ मन्थः—विलोडनम् ।
२८४ अनादरः—परिभवः ।
२८६ आप्लाव्यम्—आप्लवः (उत्प्लवः)
२८७ विशरणम्—अवयवविभागः ।
२८९ श्लाघा—आत्मप्रशंसा ।
२९० गर्वः—अभिमानः ।
२९२ उन्मादः—चित्तविकारः ।

२९४ कटे वर्षावरणयोः ॥ चटे इत्येके ॥
२९५ अत-
२९६ पट गतौ ।
२९७ रट परिभाषणे ।
२९८ लट बाल्ये ।
२९९ शट रुजाविशरणगत्यवसादनेषु ।
३०० वट वेष्टने ।
३०१ किट-
३०२ खिट त्रासे ।
३०३ शिट-
३०४ षिट अनादरे ।
३०५ जट-
३०६ झट सङ्घाते ।
३०७ भट भृतौ ।
३०८ तट उच्छ्राये ।
३०९ खट काङ्क्षायाम् ।
३१० नट नृत्तौ ।
३११ पिट शब्दसंघातयोः ।
३१२ हट दीप्तौ ।
३१३ षट अवयवे ।

२९४ आवरणम्—आच्छादनम् ।
२९७ परिभाषणम्—परिहासः—सनिन्दोपालम्भश्च ।
२९८ बाल्यम्—बालभावः—(शिशुत्वम्) ।
२९९ रुजा–रोगः–विशरणम्–अवयव–विभागः । अवसादनम्—दुःखम् ।
३०१ त्रासः—भयम् ।
३०३ अनादरः—तिरस्कारः ।
३०७ भृतिः—भरणम् ।

३१४ लुट विलोडने । डान्तोऽयमित्येके ।
३१५ चिट परप्रेष्ये ।
३१६ विट शब्दे ।
३१७ बिट आक्रोशे । हिट इत्येके ॥
३१८ ईट-
३१९ किट-
३२० कटी गतौ ।
३२१ मडि भूषायाम् ।
३२२ कुडि वैकल्ये । कुटीत्येके ।
३२३ मुड-
३२४ प्रुड मर्दने ।
३२५ चुडि अल्पीभावे ।
३२६ मुडि खण्डने ॥ पुडि चेत्येके ॥
३२७ रुटि-
३२८ लुटि स्तेये ॥ रुठि लुठि इत्येके । रुडि-लुडि इत्यपरे ॥
३२९ स्फुटिर् विशरणे ॥ स्फुटि इत्यपि केचित् ॥
३३० पठ व्यक्तायां वाचि ।
३३१ वठ स्थौल्ये ।
३३२ मठ मदनिवासयोः ।

३१५ परप्रेष्यः—प्रेषणम् ।
३१७ आक्रोशः—विरुद्धानुध्यानम् ।
३२३ मर्दनम्—तोडनम् ।
३२६ खण्डनम्—छेदनम् ।
३३१ स्थौल्यम्—पुष्टता ।
३३२ मदः—चित्तविकारः ।

३३३ कठ कृच्छ्रजीवने ।
३३४ रट परिभाषणे । रठ इत्येके ।
३३५ हठ प्लुतिशठत्वयोः ॥ बलात्कार इत्यन्ये ॥
३३६ रुठ-
३३७ लुठ-
३३८ उठ उपघाते ॥ ऊठ इत्येके ।
३३९ पिठ हिंसासंक्लेशनयोः ।
३४० शठ कैतवे च ।
३४१ शुठ गतिप्रतिघाते ॥ शुठि-इति स्वामी ।
३४२ कुठि च ।
३४३ लुठि आलस्ये प्रतिघाते च ।
३४४ शुठि शोषणे ।
३४५ रुठि-
३४६ लुठि गतौ ।
३४७ चुडु भावकरणे ।
३४८ अडु अभियोगे ।
३४९ कडु कार्कश्ये ॥ चुडुादयस्त्रयो दोपधाः ।
३५० क्रीडृ विहारे ।
३५१ तुडृ तोडने ॥ तूडृ इत्येके ॥
३५२ हुडृ-
३५३ हूडृ-

३३५ प्लुतिः—प्लवनम् । शठत्वं क्रौर्यम् ।
३४० कैतवम्—धौर्त्यम् ।
३४७ भावकरणम्—अभिप्रायसूचनम् ।
३४९ कार्कश्यम्—काठिन्यम् ।
३५१ तोडनम्—दारुणं हिंसनं च ।

३५४ हौडृ गतौ ।
३५५ रौडृ अनादरे ।
३५६ रोडृ-
३५७ लोडृ उन्मादे ।
३५८ अड उद्यमे ।
३५९ लड विलासे ॥ लल इत्येके ॥
३६० कड मदे ॥ कडि इत्येके ॥
३६१ गडि वदनैकदेशे ॥ शौटूद्रादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ अथ एदन्तीयान्ता आत्मनेपदिनः स्तोभत्यन्ताश्चतुस्त्रिंशत् ॥
३६२ तिपृ-
३६३ तेपृ-
३६४ ष्टिपृ-
३६५ ष्टेपृ क्षरणार्थाः ॥ आद्योऽनुदात्तः ॥ तेपृ कम्पने च ॥
३६६ ग्लेपृ दैन्ये ।
३६७ टुवेपृ कम्पने ।
३६८ केपृ-
३६९ गेपृ-
३७० ग्लेपृ च ।
३७१ मेपृ-

३५६ उन्मादः—चित्तविभ्रमः ।
३५८ उद्यमः—उद्योगः ।
३५९ विलासः—क्रीडा ।
३६० मदः—दर्पः ।
३६६ दैन्यम्—खेदः ।

३७२ रेपृ-
३७३ लेपृ गतौ ।
३७४ त्रपूष् लज्जायाम् ।
३७५ कपि चलने ।
३७६ रवि-
३७७ लवि-
३७८ अवि शब्दे ।
३७९ लवि अवस्रंसने च ।
३८० कवृ वर्णे ।
३८१ ह्रीवृ अधाष्टर्ये ।
३८२ क्षीवृ मदे ।
३८३ शीभृ कत्थने ।
३८४ चीभृ च ।
३८५ रेभृ शब्दे ॥ अभिरभी क्वचित्पठ्येते ॥ लभि च ।
३८६ ष्टभि-
३८७ स्कभि प्रतिबन्धे ।
३८८ जभी-
३८९ जृभि गात्रविनामे ।
३९० शल्भ कत्थने ।
३९१ वल्भ भोजने ।
३९२ गल्भ धाष्टर्ये ।
३९३ श्रम्भु प्रमादे ॥ दन्त्यादिश्च ।

३७९ अवस्रंसनम्—अधः पतनम् ।
३८१ अधाष्टर्यम्—अधृष्टता (अप्रगल्भता) ।
३८३ कत्थनम्—श्लाघा ।
३८७ प्रतिबन्धः—अवरोधः ।
३८८ गात्रविनामः—तन्द्रया मुखव्यादानम् ।
३९२ धाष्टर्यम्—धृष्टता ।

३९४ ष्टुभु स्तम्भे ॥ तिप्यादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ तिपिस्त्वनुदात्तः ॥ अथ पवर्गीयान्ताः परस्मैपदिनः एकचत्वारिंशत् ॥
३९५ गुपू रक्षणे ।
३९६ धूप सन्तापे ।
३९७ जप-
३९८ जल्प व्यक्तायां वाचि ।
जप मानसे च ॥
३९९ चप सान्त्वने ।
४०० षप समवाये ।
४०१ रप-
४०२ लप व्यक्तायां वाचि ।
४०३ क्षुप मन्दायां गतौ ।
४०४ तुप-
४०५ तुम्प-
४०६ त्रुप-
४०७ त्रुम्प-
४०८ तुफ-
४०९ तुम्फ-
४१० त्रुफ-
४११ त्रुम्फ हिंसार्थाः ।
४१२ पर्प-
४१३ रफ-
४१४ रफि-
४१५ अर्ब-

२९६ सन्तापः—दुःखम् ।
३९९ सान्त्वनम्—शान्तिः ।
४०० समवायः—सम्बन्धः । (सम्यगवबोधो वा)

४१६ पर्व-
४१७ लर्व-
४१८ बर्व-
४१९ मर्व-
४२० कर्व-
४२१ खर्व-
४२२ गर्व-
४२३ शर्द-
४२४ षर्व
४२५ । चर्व गतौ ।
४२६ कुवि आच्छादने ।
४२७ लुवि-
४२८ तुवि अर्दने ।
४२९ चुवि वक्त्रसंयोगे ।
४३० षृभु-
४३१ षृम्भु हिंसार्थौ । षिभु षिम्भु इत्येके ॥
४३२ शुभ-
४३३ शुम्भ भाषणे। भासन इत्येके॥ हिंसायामित्यन्ये ॥ गुपादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ अथ अनुनासिकान्ताः कम्यन्ताः आत्मनेपदिनो दश ॥
४३४ घिणि-
४३५ घुणि-
४३६ घृणि ग्रहणे ।

४३७ घुण-
४३८ घूर्ण भ्रमणे ।
४३९ पण व्यवहारे स्तुतौ च ।
४४० पन च ।
४४१ भाम क्रोधे ।
४४२ क्षमूष् सहने ।
४४३ कमु कान्तौ ॥ घिण्यादय उदात्ता अनुदात्तेतः आत्मनेभाषाः ॥ अथ क्रम्यन्ताः परस्मैपदिनः त्रिंशत् ॥
४४४ अण-
४४५ रण-
४४६ वण-
४४७ भण-
४४८ मण-
४४९ कण-
४५० क्वण-
४५१ व्रण-
३५२ भ्रण-
४५३ ध्वण शब्दार्थाः ॥ धण इत्यपि केचित् ॥
४५४ ओणृ अपनयने ।
४५५ शोणृ वर्णगत्योः ।
४५६ श्रोणृ सङ्घाते ।
४५७ श्लोणृ च ।
४५८ पैणृ गतिप्रेरण-श्लेषणेषु । (प्रैणृ इत्यपि) ।

---

४२६ आच्छादनम्--आवरणम् ।
४२७ अर्दनम्--पीडनम् ।
४२९ वक्त्रसंयोगः--चुम्बनम् ।

४३७ भ्रमणम्--इतस्ततश्चलनम् ।
४५४ अपनयनम्--दूरीकरणम् ।
४५८ प्रेरणम्--प्रेषणं । श्लेषणं सम्बन्धः ।

४५९ भ्रन शब्दे। बण इत्यपि केचित् ॥
४६० कनी दीप्तिकान्तिगतिषु।
४६१ घ्रन-
४६२ वन शब्दे।
४६३ वन-
४६४ षण सम्भक्तौ।
४६५ अम गत्यादिषु।
४६६ द्रम-
४६७ हम्म-
४६८ मीमृ गतौ। मीमृ शब्दे च ॥
४६९ चमु-
४७० छमु-
४७१ जमु-
४७२ झमु अदने जिमु इति केचित्।
४७३ क्रमु पादविक्षेपे ॥ अणादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ अथ रेवत्यन्ता आत्मनेपदिनश्चत्वारिंशत् ॥
४७४ अय-
४७५ वय-
४७६ पय-
४७७ मय-
४७८ चय-
४७९ तय-
४८० णय गतौ।

४६४ सम्भक्तिः--सम्यक्सेवनम्।
४७१ अदनम्--भक्षणम्।
४७३ पादविक्षेपः--चरणसञ्चालनम्।

४८१ दय दानगतिरक्षणहिंसादानेषु।
४८२ रय गतौ। लय च ॥
४८३ ऊयी तन्तुसन्ताने।
४८४ पूयी विशरणे दुर्गन्धे च।
४८५ कनूयी शब्दे उन्दे च।
४८६ क्ष्मायी विधूनने।
४८७ स्फायी-
४८८ ओप्यायी वृद्धौ।
४८९ तायृ सन्तानपालनयोः।
४९० शल चलनसंवरणयोः।
४९१ वल-
४९२ वल्ल संवरणे सञ्चरणे च।
४९३ मल-
४९४ मल्ल धारणे।
४९५ भल-
४९६ भल्ल परिभाषणहिंसादानेषु।
४९७ कल शब्दसङ्ख्यानयोः।
४९८ वल्ल अव्यक्ते शब्दे। अशब्द इति स्वामी ॥
४९९ तेवृ-
५०० देवृ देवने।
५०१ षेवृ-

४८३ तन्तुसन्तानम्--तन्तुविस्तारः।
४८४ विशरणम्--अवयवविभागः।
४८५ उन्दः--क्लेदनम्।
४८६ विधूनम्--कम्पनम्।
४९७ संख्यानम्--परिगणनम्।
४९८ अशब्दः--तूष्णीम्भावः।
४९९ देवनम्--दुःखम्।

५०२ गेवृ-
५०३ ग्लेवृ-
५०४ पेवृ-
५०५ मेवृ-
५०६ म्लेवृ सेवने ॥ शेवृ खेवृ क्लेवृ इत्येके ॥
५०७ रेवृ प्लवगतौ ॥ अयादय उदात्ता अनुदात्तेत आत्मनेभाषाः अथावत्यन्ताः परस्मैपदिनः एकनवतिः ॥
५०८ मव्य बन्धने ।
५०९ सूर्क्ष्य-
५१० ईर्क्ष्य-
५११ ईर्ष्य ईर्ष्यार्थाः ।
५१२ हय गतौ ।
५१३ शुच्य अभिषवे । चुच्य इत्येके ॥
५१४ हर्य गतिकान्त्योः ।
५१५ अल भूषणपर्याप्तिवारणेषु ॥ अयं स्वरितेदित्येके ॥
५१६ ञिफला विशरणे ।
५१७ मील-
५१८ श्मील-

५१३ अभिषवः-स्नापनं स्नानं सुरासन्धानञ्च ।
५१५ भूषणम्--अलङ्करणम् । पर्याप्तिः । पूर्णता--वारणं । निषेधः ।
५१६ विशरणम्--अवयवविभागः ।
५१७ निमेषणम्--सङ्कोचः ।

५१९ स्मील-
५२० क्ष्मील निमेषणे ।
५२१ पील प्रतिष्टम्भे ।
५२२ नील वर्णे ।
५२३ शील समाधौ ।
५२४ कील बन्धने ।
५२५ कूल आवरणे ।
५२६ शूल रुजायां सङ्घोषे च ।
५२७ तूल निष्कर्षे ।
५२८ पूल सङ्घाते ।
५२९ मूल प्रतिष्ठायाम् ।
५३० फल निष्पत्तौ ।
५३१ चुल्ल भावकरणे ।
५३२ फुल्ल विकसने ।
५३३ चिल्ल शैथिल्ये भावकरणे च ।
५३४ तिल गतौ । तिल्ल इत्येके ॥
५३५ वेलृ-
५३६ चेलृ-
५३७ केलृ-
५३८ खेलृ-
५३९ क्ष्वेलृ-

५२१ प्रतिष्टम्भः—अवरोधः । निरोधः ।
५२३ समाधिः--चित्तवृत्तिनिरोधः ।
५२५ आवरणम्--आच्छादनम् ।
५२६ रुजा--रोगः ।
५२७ निष्कर्षः--निष्कोषणं । तच्चान्तर्गतस्य बहिर्निःसारणम् ।
५३० निष्पत्तिः--पूर्णता--सिद्धिः ।
५३१ भावकरणम्--अभिप्रायसूचनम् ।

५४० वेल्ल चलने ।
५४१ पेल्ल ।
५४२ फेल्ल ।
५४३ शेल्ल गतौ । पेल्ल इत्येके ।
५४४ स्खल सञ्चलने ।
५४५ खल सञ्चये ।
५४६ गल अदने ।
५४७ पल गतौ ।
५४८ दल विशरणे ।
५४९ श्वल ।
५५० श्वल्ल आशुगमने ।
५५१ खोल्ल ।
५५२ खोर्क्ष गतिप्रतिघाते ।
५५३ धार्क्ष गतिचातुर्ये ।
५५४ त्सर छद्मगतौ ।
५५५ कमर हूर्च्छने ।
५५६ अम्र-
५५७ वम्र-
५५८ मम्र-
५५९ चर गत्यर्थाः । चरतिर्भक्षणेऽपि ॥
५६० ष्ठिवु निरसने ।
५६१ जि जये ।

५४५ सञ्चयः—सङ्ग्रहः—एकत्रीकरणम् ।
५४९ आशुगमनम्—शीघ्रगतिः ।
५५२ गतिप्रतिघातः—गमननिरोधः ।
५५३ गतिचातुर्यम्—गमननैपुण्यम् ।
५५४ छद्मगतिः—कपटगमनम् ।
५५५ हूर्छनम्—कौटिल्यम् ।
५६० निरसनम्—थुतीकरणम् ।

५६२ जीव प्राणधारणे ।
५६३ । पीव-
५६४ मीव-
५६५ तीव-
५६६ णीव स्थौल्ये ।
५६७ क्ष्वीवु-
५६८ क्ष्वेवु निरसने ।
५६९ उर्वी-
५७० तुर्वी-
५७१ थुर्वी-
५७२ दुर्वी-
५७३ धुर्वी हिंसार्थाः ।
५७४ गुर्वी उद्यमने ।
४७५ मुर्वी बन्धने ।
५७६ पूर्व-
५७७ पर्व-
५७८ मर्व पूरणे ।
५७९ चर्व अदने ।
५८० भर्व हिंसायाम् ।
५८१ कर्व-
५८२ खर्व-
५८३ गर्व दर्पे ।

५६२ प्राणधारणम्—जीवनम् ।
३६३ स्थौल्यम्—पीवरत्वम् ।
५६७ निरसनम्—थुतीकरणम् ।
५७४ उद्यमनम्—उद्योगः ।
५७५ बन्धनम्—निरोधः ।
५७६ पूरणम्—तृप्तिः ।
५७९ अदनम्—चर्वणम् ।
५८१ दर्पः—अहङ्कारः ।

५८४ अर्व ।
५८५ शर्व ।
५८६ पर्व हिंसायाम् ।
५८७ इवि व्याप्तौ ।
५८८ पिवि ।
५८९ मिवि ।
५९० णिवि सेचने । (षवीत्येके) । सेवन इति तरङ्गिण्याम् ।
५९१ हिवि ।
५९२ दिवि ।
५९३ धिवि ।
५९४ जिवि प्रीणनार्थाः ।
५९५ रिवि ।
५९६ रवि ।
५९७ धवि गत्यर्थाः ।
५९८ कृवि हिंसाकरणयोश्च ।
५९९ मव बन्धने ।
६०० अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु । मव्यादय उदात्ता उदात्तेतः परस्मैभाषाः । जिस्त्वनुदात्तः ।
६०१ धावु गतिशुध्योः । उदात्तः स्वरितेदुभयतोभाषः । अथोष्मान्ता आत्मनेपदिनो द्विपञ्चाशत् ।
६०२ धुक्ष ।
६०३ धिक्ष संदीपनक्लेशनजीवनेषु ।
६०४ वृक्ष वरणे ।
६०५ शिक्ष विद्योपादाने ।
६०६ भिक्ष भिक्षायामलाभे लाभे च ।
६०७ क्लेश अव्यक्तायां वाचि । बाधन इति दुर्गः ।
६०८ दक्ष वृद्धौ शीघ्रार्थे च ।
६०९ दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु ।

---

५८७ व्याप्तिः—व्यापनम् ।
५८८ सेचनम्—आर्द्रीभवनम् ।
५९४ प्रीणनम्—जीवनम् ।
६०० अवगमः—ज्ञानम् ।
अवाप्तिः—प्राप्तिः ।
आलिङ्गनम्—मिलनम् ।
भागः—विभागः ।
६०१ शुद्धिः—पवित्रता ।
६०२ सन्दीपनम्—ज्वलनम् ।
क्लेशनम्—क्लेशः ।
जीवनम्—प्राणधारणम् ।
६०४ वरणम्—स्वीकारः ।
६०५ विद्योपादानम्—विद्याग्रहणम् ।
६०६ अलाभः—अप्राप्तिः ।
लाभः—प्राप्तिः ।
६०९ मौण्ड्यम्—केशवपनम् ।
इज्या—यागः
उपनयनम्—व्रतबन्धः ।
नियमः—संयमः ।

६१० ईक्ष दर्शने ।
६११ ईष गतिहिंसादर्शनेषु ।
६१२ भाष व्यक्तायां वाचि ।
६१३ वर्ष स्नेहने ।
६१४ गेषृ अन्विच्छायाम् । ग्लेषृ इत्येके ।
६१५ पेषृ प्रयत्नेन । (एषृ इत्येके येषृ इत्यप्यन्ये) ।
६१६ जेषृ ।
६१७ णेषृ-
६१८ एषृ-
६१९ प्रेषृ गतौ ।
६२० रेषृ-
६२१ ह्रेषृ-
६२२ ह्वेषृ अव्यक्ते शब्दे ।
६२३ कासृ शब्दकुत्सायाम् ।
६२४ भासृ दीप्तौ ।
६२५ णासृ-
६२६ रासृ शब्दे ।
६२७ णस कौटिल्ये ।
६२८ भ्यस भये ।
६२९ आङः शसि इच्छायाम् ।
६३० ग्रसु ।
६३१ ग्लसु अदने ।
६३२ ईह चेष्टायाम् ।

व्रतम्–उपवासः ।
आदेशः–आज्ञा–(निदेशः)
६१३ स्नेहनम्—चिक्कणम् ।
६१४ अन्विच्छा—अन्वेषणम् ।

६३३ वहि-
६३४ महि वृद्धौ । (वहित्येके)
६३५ अहि गतौ ।
६३६ गर्ह-
६३७ गल्ह कुत्सायाम् ।
६३८ बर्ह-
६३९ बल्ह प्राधान्ये ।
६४० वर्ह-
६४१ वल्ह परिभाषणहिंसाच्छादनेषु ।
६४२ प्लिह गतौ ।
६४३ वेह (वेह) ।
६४४ जह-
६४५ वाह (वाह) प्रयत्ने । जेह गतावपि ।
६४६ द्राह निद्राक्षये । निक्षेप इत्येके ।
६४७ काशृ दीप्तौ
६४८ ऊह वितर्के ।
६४९ गाहू विलोडने ।
६५० गृहू ग्रहणे-
६५१ ग्लह च ।
६५२ घुषि कान्तिकरणे । घष इति केचित् । घुक्षादय उदात्ता अनुदात्तेत आत्मनेभाषाः । गृहिस्तु वेट् ।

६४० परिभाषणम्–अनृतभाषणम् ।
आच्छादनम्–आवरणम् ।
६४६ निद्राक्षयः–निद्राभङ्गः (जागरणम्) ।
६४८ वितर्कः–विचारः ।
६४९ विलोडनम्–प्रतीघातः ।

अथ अर्हत्यन्ताः परस्मैपदिन एकनवतिः ।

६५३ घुषिर् अविशब्दने । शब्द इति अन्ये पेठुः ।

६५४ अक्षू व्याप्तौ ।

६५५ तक्षू-

६५६ त्वक्षू तनूकरणे ।

६५७ उक्ष सेचने ।

६५८ रक्ष पालने ।

६५९ णिक्ष चुम्बने ।

६६० त्रक्ष-

६६१ ष्ट्रक्ष (तृक्ष ष्टृक्ष)-

६६२ णक्ष गतौ ।

६६३ वक्ष रोषे । संघात इत्येके ।

६६४ मृक्ष संघाते । म्रक्ष इत्येके ।

६६५ तक्ष त्वचने । पक्ष परिग्रह इत्येके ।

६६६ सूर्क्ष आदरे । षर्क्ष इति केचित् ।

६६७ काक्षि-

६६८ वाक्षि-

६६९ माक्षि काङ्क्षायाम् ।

६७० द्राक्षि-

६७१ ध्राक्षि-

६७२ ध्वाक्षि घोरवासिते च ।

६७३ चूष पाने ।

६७४ तूष तुष्टौ ।

६७५ पूष वृद्धौ ।

६७६ मूष स्तेये ।

६७७ लूष-

६७८ रूष भूषायाम् ।

६७९ शूष प्रसवे ।

६८० यूष हिंसायाम्-

६८१ जूष च ।

६८२ भूष अलङ्कारे ।

६८३ ऊष रुजायाम् ।

६८४ इष उञ्छे ।

६८५ कष-

६८६ खष-

६८७ शिष-

६८८ जष-

६८९ झष-

६९० शष-

६९१ वष-

६९२ मष-

६९३ रुष-

६९४ रिष हिंसार्थाः ।

६९५ भष भर्त्सने ।

६९६ उष दाहे ।

---

६५३ अविशब्दनम्—अप्रतिज्ञानम् ।

६५५ तनूकरणम्—तीक्ष्णीकरणम् ।

६६५ त्वचनम्—संवरणम्—त्वचोग्रहणञ्च ।

६६६ आदरः—सत्कारः ।

६६७ काङ्क्षा—इच्छा ।

७० घोरवासितम्—घोरशब्दः ।

६७९ प्रसवः—अभ्यनुज्ञानम् ।

६८३ रुजा—पीडा ।

६८४ उञ्छः—कणश आदानं कणिशाद्यर्जनं शिलम् ।

६९५ भर्त्सनम्—श्वरवः ।

६९७ जिषु-
६९८ विषु-
६९९ मिषु सेचने ।
७०० पुष पुष्टौ ।
७०१ श्रिषु-
७०२ श्लिषु-
७०३ प्रुषु-
७०४ प्लुषु दाहे ।
७०५ पृषु-
७०६ वृषु-
७०७ मृषु सेचने । मृषु सहने च । इतरौ हिंसासंक्लेशनयोश्च ।
७०८ घृषु सङ्घर्षे ।
७०९ हृषु अलीके ।
७१० तुस-
७११ हृस-
७१२ ह्लस-
७१३ रस शब्दे ।
७१४ लस श्लेषणक्रीडनयोः ।
७१५ घस्लृ अदने ।
७१६ जर्ज-
७१७ चर्च-

७०४ दाहः—भस्मीकरणम् ।
७०५ सेचनम्—आर्द्रीकरणम् । सहनम्—मर्षणम् ।
७०८सङ्घर्षः—परामिभवेच्छा ।
७०९ अलीकम्—मिथ्याभाषणम् ।
७१४ श्लेषणम्—आलिङ्गनम् ।
७१६ परिभाषणम्—अनृतभाषणम् । तर्जनम्—भत्सर्नम् ।

७१८ झर्झ परिभाषणहिंसातर्जनेषु ।
७१९ पिसृ-
७२० पेसृ गतौ ।
७२१ हसे हसने ।
७२२ णिश समाधौ ।
७२३ मिश-
७२४ मश शब्दे रोषकृते च ।
७२५ शव गतौ-
७२६ शश प्लुतगतौ ।
७२७ शसु हिंसायाम् ।
७२८ शंसु स्तुतौ । दुर्गताविति दुर्गः ।
७२९ चह परिकल्कने ।
७३० मह पूजायाम् ।
७३१ रह त्यागे ।
७३२ रहि गतौ ।
७३३ दह-
७३४ दहि-
७३५ बृह-
७३६ बृहि वृद्धौ बृहि शब्दे च । बृहिर् चेत्यके ।
७३७ तुहिर्-
७३८ दुहिर्
७३९ उहिर् अर्दने ।
७४० अर्ह पूजायाम् । घुषिरा-

७२२ समाधिः—चित्तवृत्तिनिरोधः ।
७२६ प्लुतगतिः—उत्प्लुत्यगमनम् ।
७२९ परिकल्कनम्—दम्भः शाठ्यं च ।
७३७ अर्दनम्—पीडनम् ।

दय उदात्ता उदात्तेतः परस्मैभाषाः। घसिस्त्वनुदात्तः। अथ कृपूपर्यन्ता अत्मनेपदिनष्षड्विंशतिः।

७४१ द्युत दीप्तौ।

७४२ श्विता वर्णे।

७४३ ञिमिदा स्नेहने।

७४४ ञिष्विदा स्नेहनमोचनयोः। मोहनयोरित्येके। ञिक्ष्विदा चेत्येके।

७४५ रुच दीप्तावभिप्रीतौ च।

७४६ घुट परिवर्तने।

७४७ रुट-

७४८ लुट-

७४९ लुठ प्रतिघाते।

७५० शुभ दीप्तौ।

७५१ क्षुभ सञ्चलने।

४५२ णभ-

७५३ तुभ हिंसायाम्। आद्योऽभावेऽपि।

७५४ स्रंसु-

७५५ ध्वंसु-

७४१ दीप्तिः—प्रकाशः।

७४४ स्नेहनम्—चिक्कणम्।
मोचनम्—त्यागः।
मोहनम्—वशीकरणम्।

७४५ अभिप्रीतिः—अभिलाषः।

७४६ परिवर्तनम्—सञ्चालनम्।

७५४ अवस्रंसनम्—अधःपतनम्।

७५६ भ्रंसु अवस्रंसने। ध्वंसु गतौ च। भ्रंशु इत्यपि केचित्। तृतीय एव तालव्यान्त इत्यन्ये।

७५७ स्रंभु विश्वासे।

७५८ वृतु वर्तने।

७५९ वृधु वृद्धौ।

७६० शृधु शब्दकुत्सायाम्।

७६१ स्यन्दू प्रस्रवणे।

७६२ कृपू सामर्थ्ये। द्युतादय उदात्ता अनुदात्तेतः आत्मनेभाषा। वृत्। अथ त्वरत्यन्ताः त्रयोदशात्मनेपदिनः षितश्च।

७६३ घट चेष्टायाम्।

७६४ व्यथ भयसञ्चलनयोः।

७६५ प्रथ प्रख्याने।

७६६ प्रस विस्तारे।

७६७ म्रद मर्दने।

७६८ स्खद स्खदने।

७६९ क्षजि गतिदानयोः।

७७० दक्ष गतिहिंसनयोः।

७७१ क्रप कृपायां गतौ च।

७५७ विश्वासः—विस्रम्भः।

७५८ वर्तनम्—स्थितिः।

७६१ प्रस्रवणम्—निस्यन्दनम्।

७६२ सामर्थ्यम्—पराक्रमः।

६६३ चेष्टा—व्यापारः।

७६५ प्रख्यानम्—प्रसिद्धिः।

७६७ मर्दनम्—पीडनम्।

७६८ स्खदनम्—विद्रावणम्।

७७२ कदि-
७७३ क्रदि-
७७४ क्लदि वैकल्य इत्येके। त्रयोऽप्यनिदितइति नन्दी। इदित इतिस्वामी कदिक्रदी इदितौ क्रद क्लद इति चानिदितौ इति मैत्रेयः।
७७५ ञित्वरा सम्भ्रमे। घटादयः षितः। उदात्ता अनुदात्तेत आत्मनेभाषाः। अथ फणान्ताः परस्मैपदिनः।
७७६ ज्वर रोगे।
७७७ गड सेचने।
७७८ हेड वेष्टने।
७७९ वट-
७८० भट परिभाषणे।
७८१ णट नृत्तौ। नतावित्येके। गतावित्यन्ये।
७८२ षृक प्रतिघाते।
७८३ चक तृप्तौ।
७८४ कखे हसने।
७८५ रगे शङ्कायाम्।
७८६ लगे सङ्गे।
७८७ ह्वगे-
७८८ ह्लगे-
७८९ षगे-
७९० ष्टगे संवरणे।
७९१ कगे नोच्यते।
७९२ अक-
७९३ अग कुटिलायां गतौ।
७९४ कण-
७९५ रण गतौ।
७९६ चण-
७९७ शण-
७९८ श्रण दाने च। शण गतावित्यन्ये।
७९९ श्रथ (श्रथ श्लथ)
८०० क्लथ-
८०१ क्रथ-
८०२ क्लथ हिंसार्थाः।
८०३ वन च। वनु च नोच्यते।
८०४ ज्वल दीप्तौ।
८०५ ह्वल-
८०६ ह्मल चलने।
८०७ स्मृ आध्याने।
८०८ दॄ भये।
८०९ नॄ नये।
८१० श्रा पाके। मारणतोषणनिशामनेषु।

---

७७२ वैक्लव्यम्- विकलता।
७७५ सम्भ्रमः-शीघ्रता।
७७६ रोगः—व्याधिः।
७७७ सेचनम्-आर्द्रीकरणम्।
७७८ वेष्टनम्-परिवेष्टनम्।
७७९ परिभाषणम्—श्वरवः।
७८७ संवरणम्—स्वीकारः।
७९२ कुटिलगतिः-क्रूरगमनम्।
८०७ अध्यानम्-उत्कण्ठापूर्वकम्।
८०९ नयः—प्रापणम्।
८१० मारणम्—हिंसा।
तोषणम्-तुष्टिः।

८११ ज्ञा । निशानेष्विति पाठान्तरम् ।

८१२ चलिः कम्पने-

८१३ छदिर् ऊर्जने ।

८१४ लडिः जिह्वोन्मथने ।

८१५ मदी हर्षग्लेपनयोः ।

८१६ ध्वन शब्दे । दलि–वलि–स्खलि–रणि–ध्वनि–त्रपि–क्षपयश्चेति भोजः ।

८१७ स्वन अवतंसने । घटादयो मितः । जनी–जॄष्–क्नसु–रञ्जो–ऽमन्ताश्च । ज्वल–ह्वल–ह्मल–नमामनुपसर्गाद्वा । ग्ला–ह्ला–वनु–वमां च । न कमि–अमि–चमाम् ।

८१८ शमो दर्शने ।

८१९ यमोऽपरिवेषणे ।

८२० स्खदिर् अवपरिभ्यां च ।

८२१ फण गतौ । घटादयः फणान्ता मितः । वृत् । ज्वरादय उदात्ता उदात्तेतः परस्मैभाषाः ।

८२२ राजृ दीप्तौ । उदात्तः स्वरितेदुभयतो भाषाः ।

८२३ टुभ्राजृ-

८२४ टुभ्राशृ-

८२५ टुभ्लाशृ दीप्तौ । उदात्ता अनुदात्तेतः आत्मनेभाषाः । अथ क्षरत्यन्ताः परस्मैपदिनः ।

८२६ स्युमु-

८२७ स्वन-

८२८ ध्वन शब्दे । फणादयो गताः ।

८२९ षम-

८३० ष्टम अवैकल्ये । वृत् ।

८३१ ज्वल दीप्तौ ।

८३२ चल कम्पने ।

८३३ जल घातने ।

८३४ टल-

८३५ ट्वल वैक्लव्ये ।

८३६ ष्ठल स्थाने ।

८३७ हल विलेखने ।

८३८ णल गन्धे । बन्धन इत्येके ।

८३९ पल गतौ ।

निशामनम्— तीक्ष्णीकरणम् ।

८१३ ऊर्जनम्—बलम् ।

८१४ जिह्वोन्मथम्—जिह्वया शापनम् ।

८१५ ग्लेपनम्—दैन्यम् ।

८१९ अपरिवेषणम्–अभोजनम् ।

८२२ दीप्तिः—शोभा ।

८२९ अवैकल्यम्—अविकलता ।

५३२ कम्पनम्—विधूननम् ।

८३३ घातनम्—तैक्ष्ण्यम् ।

८३४ वैक्लव्यम्—भयजनितोद्विग्नता ।

८३६ स्थानम्—उपवेशनाधिकरणम् ।

८३७ विलेखनम्—आकर्षणम् ।

८४० बल प्राणने धान्यावरो धने च ।
८४१ पुल महत्त्वे ।
८४२ कुल संस्त्याने बन्धुषु च ।
८४३ शल-
८४४ हुल-
८४५ पल्ल गतौ । (हुल हिंसायां संवरणे च) ।
८४६ क्वथे निष्पाके ।
८४७ पथे गतौ ।
८४८ मथे विलोडने ।
८४९ टुवम् उद्गिरणे ।
८५० भ्रमु चलने ।
८५१ क्षर सञ्चलने । स्यामादय उदात्तेतः परस्मैभाषाः ।
८५२ षह मर्षणे । उदात्तोऽनुदात्तेदात्मनेभाषाः ।
८५३ रमु क्रीडायाम् । रम ईति माधवः । अनुदात्तोऽनुदात्तेदात्मनेभाषः । अथ कसन्ताः परस्मैपदिनः ।

८४० प्राणनम्—जीवधारणम् ।
८४१ महत्त्वम्—उत्कृष्टता ।
८४२ संस्त्यानम्—सङ्घातः ।
बन्धुः—बन्धुतानुकूलव्यापारः ।
८४६ निष्पाकः—नितरां पाचनम् ।
८४८ विलोडनम्—प्रतीघातः ।
८४९ उद्गिरणम्—उद्वमनम् ।
८५२ मर्षणम्—क्षमाऽभिभवश्च ।
८५३ क्रीडा—विहारः ।

८५४ षद्लृ विशरणगत्यवसादनेषु ।
८५५ शद्लृ शातने ।
८५६ क्रुश आह्वाने रोदने च । षदादयस्त्रयोऽनुदात्ता उदात्तेतः परस्मैषाः ।
८५७ कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु ।
८५८ बुध अवगमने ।
८५९ रुह बीजजन्मनि प्रादुर्भावे च ।
८६० कस गतौ । वृत् । कुचादय उदात्ता उदात्तेतः परस्मैभाषाः । रुहिस्त्वनुदात्तेतः । ज्वलादिर्गतः । अथ गुहूत्यन्ताः स्वरितेतः ।
८६१ हिक्क अव्यक्ते शब्दे ।
८६२ अञ्चु गतौ याचने च । अचु इत्येके । अचि इत्यपरे ।
८६३ टुयाचृ याच्ञायाम् ।
८६४ रेट्ट परिभाषणे ।

८५४ विशरणम्—अवयवविभागः ।
८५५ शातनम्—पीडनम् ।
८५६ आह्वानम्—सम्बोधनम् ।
८५९ बीजजन्म—बीजोत्पत्तिः ।
प्रादुर्भावः—अतिक्रान्तोत्पत्तिः ।
८६४ परिभाषणम्—श्वरवः ।

८६५ चते-
८६६ चदे याचने ।
८६७ प्रोथृ पर्याप्तौ ।
८६८ मिदृ-
८६९ मेदृ मेधाहिंसनयोः । था-
न्ताविमाविति स्वामी ।
धान्ताविति न्यासः ।
८७० मेधृ सङ्गमे च ।
८७१ णिदृ-
८७२ णेदृ कुत्सासन्निकर्षयोः ।
८७३ श्रृधु-
८७४ मृधु उन्दने ।
८७५ बुधिर् बोधने ।
८७६ उबुन्दिर् निशामने ।
८७७ वेणृ गतिज्ञानचिन्तानि-
शामनवादित्रग्रहणेषु ।
नान्तोऽप्ययम् ।
८७८ खनु अवदारणे ।
८७९ चीवृ आदानसंवरणयोः ।
८८० चायृ पूजानिशामनयोः ।
८८१ व्यय गतौ
८८२ दाशृ दाने ।
८८३ भेषृ भये । गतावित्येके ।
८८४ भ्रेषृ-

८६७ पर्याप्तिः—पूर्णता ।
८७१ कुत्सा—निन्दा-सन्निकर्षः-सामीप्यम् ।
८७३ उन्दनम्—क्लेदनम् ।
८७६ निशामनम्—चाक्षुषज्ञानम् ।
८७८ अवदारणम्—खननम् ।
८७९ आदानम्-ग्रहणम् संवरणम्-स्वीकारः ।

८८५ भ्लेषृ गतौ ।
८८६ अस गतिदीप्त्यादानेषु ।
अष इत्येके ।
८८७ स्पश बाधनस्पर्शनयोः ।
८८८ लष कान्तौ ।
८८९ चष भक्षणे ।
८९० छष हिंसायाम् ।
८९१ झष आदानसंवरणयोः ।
८९२ भ्रक्ष-
८९३ भ्लक्ष अदने ।
(भक्ष इति मैत्रेयः) ।
८९४ दासृ दाने ।
८९५ माहृ माने ।
८९६ गुहू संवरणे । हिक्कादय
उदात्ताः स्वरितेत उभ-
यतोभाषाः ।
अथाजन्ता उभयपदिनः ।
८९७ श्रिञ् सेवायाम् । उदात्त
उभयतो भाषः ।
८९८ भृञ् भरणे ।
८९९ हृञ् हरणे ।
९०० धृञ् धारणे ।
९०१ णीञ् प्रापणे । भृञादय-
श्चत्वारोऽनुदात्ता उभय-
तो भाषाः । अथ अजन्ताः
परस्मैपदिनः ।

८८७ स्पर्शनम्—ग्रथनम् ।
८९८ भरणम्—पोषणम् ।
८९९ हरणम्—प्रापणम्, स्वीकारः, स्तेयम्,
नाशनञ्च ।

९०२ धेट् पाने ।
९०३ ग्लै-
९०४ म्लै हर्षक्षये ।
९०५ द्यै न्यक्करणे ।
९०६ द्रै स्वप्ने ।
९०७ ध्रै तृप्तौ ।
९०८ ध्यै चिन्तायाम् ।
९०९ रै शब्दे ।
९१० स्त्यै-
९११ ष्ट्यै शब्दसङ्घातयोः ।
९१२ खै खदने ।
९१३ क्षै-
९१४ जै-
९१५ षै क्षये ।
९१६ कै-
९१७ गै शब्दे ।
९१८ शै-
९१९ श्रै पाके । स्रै इति केषु-
चित्पाठः ।
९२० पै-
९२१ ओवै शोषणे ।
९२२ छै-
९२३ ष्णै वेष्टने । शोभायां चे-
त्येके ।
९२४ दैप् शोधने
९२५ पा पाने ।

९०३ हर्षक्षयः—धातुक्षयः ।
९०५ न्यक्करणम्—तिरस्कारः ।

९२६ घ्रा गन्धोपादाने ।
९२७ ध्मा शब्दाग्निसंयोगयोः ।
९२८ ष्ठा गतिनिवृत्तौ ।
९२९ म्ना अभ्यासे ।
९३० दाण् दाने ।
९३१ ह्वृ कौटिल्ये ।
९३२ स्वृ शब्दोपतापयोः ।
९३३ स्मृ चिन्तायाम् ।
९३४ ह्वृ संवरणे ।
९३५ सृ गतौ ।
९३६ ऋ गतिप्रापणयोः ।
९३७ गृ
९३८ घृ सेचने ।
९३९ ध्वृ हूर्च्छने ।
९४० स्नु गतौ ।
९४१ षु प्रसवैश्वर्ययोः ।
९४२ श्रु श्रवणे ।
९४३ ध्रु स्थैर्ये
९४४ द्रु-
९४५ द्रु गतौ ।
९४६ जि-
९४७ ज्रि अभिभवे । धयत्या-
दयोऽनुदात्ताः परस्मैभा-

९२६ गन्धोपादानम्—गन्धग्रहणम् ।
९२८ गतिनिवृत्तिः—गमनविरोधः ।
९३१ कौटिल्यम्—क्रौर्यम् ।
९३२ उपतापः—रोगः ।
९३३ चिन्ता—स्मृतिः ।
९३९ हुर्च्छनम्—कौटिल्यम् ।
९४६ अभिभवः—न्यूनीकरणं-न्यूनीभवनं च ।

षाः अथ डीडन्ता ङितः ।

९४८ ष्मिङ् ईषद्धसने ।

९४९ गुङ् अव्यक्ते शब्दे ।

९५० गाङ् गतौ ।

९५१ कुङ्-

९५२ घुङ्-

९५३ उङ्-

९५४ ङुङ् शब्दे । उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्यन्ये ।

९५५ च्युङ्-

९५६ ज्युङ्-

९५७ प्रुङ्-

९५८ प्लुङ् गतौ । क्लुङ् इत्येके ।

९५९ रुङ् गतिरेषणयोः ।

९६० धृङ् अवध्वंसने ।

९६१ मेङ् प्रणिदाने ।

९६२ देङ् रक्षणे ।

९६३ श्यैङ् गतौ ।

९६४ प्यैङ् वृद्धौ ।

९६५ त्रेङ् पालने । ष्मिङ्ङादयोऽनुदात्ता आत्मनेभाषाः ।

९६६ पूङ् पवने ।

९६७ मूङ् बन्धने ।

९६८ डीङ् विहायसा गतौ । पूङादयस्त्रय उदात्ता आत्मनेभाषाः ।

९६९ तॄ प्लवनतरणयोः । उदात्तः परस्मैभाषः । अथाष्टावात्मनेपदिनः ।

९७० गुप गोपने ।

९७१ तिज निशाने ।

९७२ मान पूजायाम् ।

९७३ बध बन्धने । गुपादयश्चत्वार उदात्ता अनुदात्तेत आत्मनेभाषाः ।

९७४ रभ राभस्ये ।

९७५ डुलभष् प्राप्तौ ।

९७६ ष्वञ्ज परिष्वङ्गे ।

९७७ हद पुरीषोत्सर्गे । रभादयश्चत्वार उदात्ता अनुदात्तेत आत्मनेभाषाः ।

९७८ ञिष्विदा अव्यक्ते शब्दे । उदात्त उदात्तेत् परस्मैभाषः ।

---

९५९ रेषपम्—हिंसा ।

९६० अवध्वंसनम्—विनाशः ।

९६१ प्रणिदानम्—विनिमयः—प्रत्यर्पणं च ।

९६६ पवनम्—पवित्रीकरणम् ।

९६८ विहायसागतिः—आकाशमार्गेणगमनम् ।

९६९ प्लवनम्—प्लुतगतिः । तरणम्—प्लवनं—सन्तरणं च ।

९७० गोपनम्—रक्षणम् ।

९७१ निशानम्—तीक्ष्णीकरणम् ।

९७४ राभस्यम्—रभसक्रिया ।

९७६ परिष्वङ्गः—आलिङ्गनम् ।

९७७ पुरीषोत्सर्गः—मलत्यागः ।

९७९ स्कन्दिर् गतिशोषणयोः ।
९८० यभ मैथुने ।
९८१ णम प्रह्वत्वे शब्दे च ।
९८२ गम्लृ-
९८३ सृप्लृ गतौ ।
९८४ यम उपरमे ।
९८५ तप सन्तापे ।
९८६ त्यज हानौ ।
९८७ षञ्ज संगे ।
९८८ दृशिर् प्रेक्षणे ।
९८९ दंश दशने ।
९९० कृष विलेखने ।
९९१ दह भस्मीकरणे ।
९९२ मिह सेचने । स्कन्दादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ।
९९३ कित निवासे रोगापनयने च । उदात्तेत् परस्मैभाषः । अथ वहत्यन्ताः स्वरितेतः ।
९९४ दान खण्डने ।
९९५ शान तेजने । उदात्तौ स्वरितेतावुभयतोभाषौ ।
९९६ डुपचष् पाके ।
९९७ षच समवाये ।
९९८ भज सेवायाम् ।
९९९ रञ्ज रागे ।
१००० शप आक्रोशे ।
१००१ त्विष दीप्तौ ।
१००२ यज देवपूजासङ्गतिकरणदानेषु ।
१००३ डुवप् बीजसन्ताने । छेदनेऽपि ।
१००४ वह प्रापणे । पचादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः । षचिस्तूदात्तः ।
१००५ वस निवासे । अनुदात्त उदात्तेत् परस्मैभाषः ।
१००६ वेञ् तन्तुसन्ताने ।
१००७ व्येञ् संवरणे ।
१००८ ह्वेञ् स्पर्धायां शब्दे च । वेञादयस्त्रयोऽनुदात्ता उभयतोभाषाः । अथ परस्मैपदिनौ ।

---

९८० मैथुनम्—सुरतकर्म ।
९८१ प्रह्वत्वम्—प्रणमनम् ।
९८४ उपरमः—निवृत्तिः ।
९८९ दशनम्—दंष्ट्राव्यापारः ।
९९० विलेखनम्—आकर्षणम् ।
९९३ रोगापनयनम्—रोगदूरीकरणम् ।
९९५ तेजनम्—निशामनम् ।
९९७ समवायः—सम्बन्धः ।
१००० आक्रोशः—विरुद्धानुध्यानम् ।
१००३ बीजवपनम्—बीजस्यक्षेत्रेविकिरणम् । अस्य धातोः छेदनमप्यर्थः ।
१००६ तन्तुसन्तानम्—वस्त्रनिर्माणम् ।
१००७ संवरणम्—स्वीकारः ।
१००८ स्पर्द्धा—अन्याभिभवेच्छा ।

१००९ वद व्यक्तायां वाचि ।

१०१० टुओश्वि गतिवृद्ध्योः । वृत् । यजादिस्समाप्तः । अयं वदतिश्चोदात्तौ परस्मैभाषौ । चुलुम्पत्यादिश्च भ्वादौ द्रष्टव्याः । तस्य आकृतिगणत्वात् । ऋतिः सौत्रश्च सजुगुप्साकृपयोः । इति शब्विकरणा भ्वादयः ॥ १ ॥ (१०१०)

अथ अदादयः

१०११ अद भक्षणे ।

१०१२ हन हिंसागत्योः । अनुदात्तावुदात्तेतौ परस्मैपदिनौ । अथ चत्वारः स्वरितेतः ।

१०१३ द्विष अप्रीतौ ।

१०१४ दुह प्रपूरणे ।

१०१५ दिह उपचये ।

१०१६ लिह आस्वादने । द्विषादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ।

१०१७ चक्षिङ् व्यक्तायां वाचि । अयं दर्शनेऽपि । अनुदात्तोऽनुदात्तेत् आत्मनेपदी । अथ पृच्यन्ताः अनुदात्तेतो दश ।

१०१८ ईर गतौ कम्पने च ।

१०१९ ईड स्तुतौ ।

१०२० ईश ऐश्वर्ये ।

१०२१ आस उपवेशने ।

१०२२ आङः शासु इच्छायाम् ।

१०२३ वस आच्छादने ।

१०२४ कसि गतिशासनयोः । अयमनिदिति केचित् । कस इत्येके । कश ईत्यपि ।

१०२५ णिसि चुम्बने ।

१०२६ णिजि शुद्धौ ।

